## परिमाणे पचः। (३३/२९४८)

परिमाणं प्रस्थादि, तस्मिन् कर्मण्युपपदे पचेः खश् प्रत्ययो भवति। प्रस्थं पचति प्रस्थंपचा [1]स्थाली। [2]द्रोणंपचः। खारिंपचः कटाहः॥

## मितनखे च। (३४/२९४९)

मित नख इत्येतयोः कर्मणोरुपपदयोः पचेः[3] खश् प्रत्ययो भवति। [4]अपरिमाणार्थः आरम्भः। मितं पचति[5] मितम्पचा ब्राह्मणी[6]। नखंपचा यवागूः॥

## विध्वरुषोस्तुदः। (३५/२९५०)

विधु अरुस् इत्येतयोः कर्मणोरुपपदयोः तुदेर्धातोः खश् प्रत्ययो भवति। विधुन्तुदः [7]राहुः। अरुन्तुदः॥

## असूर्यललाटयोर्दृशितपोः। (३६/२९५१)

असूर्य ललाट इत्येतयोः कर्मणोरुपपदयोः[8] दृशितपोः धात्वोः खश् प्रत्ययो भवति। असूर्यंपश्या राजदाराः। ललाटंतपः आदित्यः। [9]असूर्य इति चासमर्थसमासोऽयं, दृशिना नञः सम्बन्धात्, सूर्यं न पश्यन्ति इति। गुप्तिपरं चैतत्। एवं नाम गुप्ता यदपरिहार्यदर्शनं [10]सूर्यमपि न पश्यन्ति इति॥

## उग्रम्पश्येरम्मदपाणिन्धमाश्च। (३७/२९५२)

उग्रम्पश्य इरम्मद पाणिन्धम इत्येते शब्दा निपात्यन्ते। उग्रं [11]पश्यति इति उग्रम्पश्यः। इरया[12] माद्यति इति इरम्मदः[13]। पाणयो ध्मायन्ते एषु इति पाणिन्धमाः पन्थानः[14]॥

## प्रियवशे वदः खच्। (३८/२९५३)

प्रिय वश इत्येतयोः कर्मणोः उपपदयोः वदेः धातोः खच् प्रत्ययो भवति। प्रियं वदति इति प्रियंवदः। वशंवदः। चकारः 'खचि ह्रस्वः' (६.४.९४/२९५५) इति विशेषणार्थः। [15]खकारो मुमर्थः। प्रत्ययान्तर-करणमुत्तरार्थम्।

---

1. स्थाली नास्ति फ. 2. द्रोणंपचा स्थाली ब. फ. 3. धातोः इत्यधिकम् क. फ. 4. अपरिमाणार्थो अयम् फ. 5. इति इत्यधिकम् फ. 6. निःस्वा इत्यधिकम् ग. 7. राहुः नास्ति ब. क. फ. 8. यथासंख्यम् इत्यधिकम् अ. ब. क. 9. असूर्यम् फ. 10. अपि इत्यधिकम् ब. 11. पश्यन्ति फ. 12. उदकेन इत्यधिकम् अ. 13. मेघज्योतिः इत्यधिकम् फ. 14. चकारात् करन्धयः शुनिंधमः इत्यधिकम् ग. 15. खकारो मुमर्थः नास्ति फ.